JGI

# JAIN COLLEGE

463/465, 18th Main Road, SS Royal, 80 Feet Road
Rajarajeshwari Nagar, Bangalore - 560 098

*Date:* **SUBJECT: SANSKRIT**

***I PUC***
***MOCK - I***

***Timings Allowed: 3 Hrs*** ***Total Marks: 100***

I. एकवाक्येन संस्कृतभाषया उत्तरं लिखत - 10×1=10.

1. भुवनस्य गोप्ता कः?
2. त्यागे रामः केन समः?
3. कपिञ्जलः किमर्थम् अन्यं देशं गतः?
4. भीमसेनः केन सह तुल्यः?
5. वृद्धश्रवः कः?
6. पर्वतराजस्य पुत्री का?
7. जनाः कस्य वचनैः तुष्यन्ति?
8. कस्य भयेन कालियः यमुनां प्रविशति?
9. राजा केन यशः प्राप्नोति?
10. 'श्री' महोदयः कदा जन्म लेभे?

II. द्वित्रैः वाक्यैः संस्कृतभाषया - कन्नडभाषया - आङ्ग्लभाषया वा उत्तरं लिखत। 5×2=10.

11. ब्रह्मणः स्वरूपं वर्णयत।
12. श्रीरामस्य गुणान् सङ्गृह्य लिखत।
13. वायसः सोद्वेगं किम् अचिन्तयत।
14. भीमसेनः किमर्थं हनुमतः क्षमां याचति?
15. ताटका वृत्तान्तः।
16. मुनयः किमर्थं हिमवतः समीपम् आगताः?
17. सुभाषिते विद्या कथं प्रशंसिता?

III. पाठनाम उल्लिख्य श्लोकानाम् अनुवादं कन्नडभाषया आङ्ग्लभाषया वा कुरुत – [त्रयाणामेव] 3x3=9.

18. प्रजासुखत्वे चन्द्रस्य वसुधायाः क्षमागुणैः ।
बुद्ध्या बृहस्पतेस्तुल्यो वीर्ये साक्षाच्छचीपतेः ॥

19. एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥

20. गरिमहान् गिरेरब्धिः महानब्धेर्नभो महत् ।
नभसोऽपि महत् ब्रह्म ततोऽप्याशा गरीयसी ॥

21. उत्तिष्ठ देहि मे मार्गं पश्य वा मेऽद्य पौरुषम् ।
मच्छासनमकुर्वाणं त्वां वा नेष्ये यमक्षयम् ॥

22. धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः ।
यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ॥

IV. पाठनाम उल्लिख्य कः कं प्रति अवदत् इति - संस्कृतभाषया लिखत । 4x2=8
[चतुर्णामेव]

23. यद्भूतयोनिं परिपश्यन्ति धीराः ।

24. मया द्रष्टव्योऽयं न्यायः ।

25. मारीचनीचं जनयाम्बभूव ।

26. इदानीं तु निद्रासमयः ।

27. दर्शितोऽनुरागः ।

28. महीपालस्य पूजा स्वदेशे सम्भवति ।

V. दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा लघुटिप्पणीः लिखत । [चतुर्णामेव] 4x5=20.

29. मार्जारः शशकपिञ्जलौ कथं व्यापादयति ?

30. हनूमद्भीमसंवादः ।

31. ताटकावृत्तान्तः ।

32. कन्येयं कुलजीवितम् इति पद्यभागस्य साराशं लिखत।

33. ज्यौतिषिकस्य समयप्रज्ञा।

34. देवव्रत - चन्द्रधरयोः मैत्रीं वर्णयत।

VI. 35. एतासां कृतीनां कवीनां नाम सूचयत। [संस्कृतभाषया] 1×5=05

1. मेघदूतम्
2. शिशुपालवधम्
3. पञ्चलहरी
4. दशकुमारचरितम्
5. उत्तररामचरितम्.

36. दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा लघु टिप्पणीं रचयत। [एकस्य] 5×1=05

1. कथासाहित्यम्

अथवा

सुभाषितानि.

VII. 37. मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत। 3×1=03.

1. ब्रह्मा देवानां ______ सम्बभूव।
2. श्रुतेः परमार्थं ______ न जानन्ति।
3. प्रायेण ______ कन्यार्थेषु कुटुम्बिनः।

[गृहिणीनेत्राः, प्रथमः, मूर्खाः]

VIII. 38. संयोजयत। 1×4=04

| अ | आ |
|---|---|
| मेना | बलरामः |
| संकर्षणः | केशलोमानि. |
| भूमिः | पर्वतराजः |
| पुरुषात् | गुरुत्वाकर्षणम् |

IX. 39. द्वयोः प्रश्ननिर्माणं कुरुत। [रेखाङ्कितानि पदानि आश्रित्य]
1×2=02.

i) शम्भुः ते दुहितरं वृणुते।

ii) सकलेष्वपि प्राणिषु दया अपेक्ष्यते।

iii) नदीतीरे धर्मवादी तिष्ठति।

X. एतेषाम् उपप्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत। [षण्णामेव]
6×2=12.

40. सन्धिं विभजत [द्वयोः]

इत्युक्त्वा , कृष्णश्च , धर्मोपदेशकः

41. सन्धिं योजयत [द्वयोः]

तत् + दिनस्य , न + उपपद्यते , भोजन + अनन्तरम्

42. रिक्तस्थाने सूक्तं विभक्तिरूपं लिखत। [द्वयोः]

| | | |
|---|---|---|
| तस्मात् | - | तेभ्यः |
| | गिरी | गिरयः |
| कविना | कविभ्याम् | |

43. रिक्तस्थाने सूक्तं क्रियापदरूपं लिखत। [द्वयोः]

| | | |
|---|---|---|
| नृत्य / नृत्यतात् | | नृत्यत |
| अपश्यत् | अपश्यताम् | |
| तुष्यति | | तुष्यन्ति |

44. विग्रहवाक्यं लिखत। [द्वयोः]

ज्येष्ठपुत्रः , गाधिनन्दनः , महाबलः

45. समस्तपदं लिखत। [द्वयोः]

46. पदपरिचयं कुरुत । [द्वयोः]

विमृश्य, ज्ञात्वा, चिन्तितवान्

47. समानार्थकपदं लिखत ।

विद्वान्, नयनम्

48. विरुद्धार्थकपदं लिखत ।

उत्साहः, सुखम्

XI. 49. संस्कृतभाषया अनुवदत । 1×4=04

i) ರಾಜನು ಕವಿಗಳನ್ನು ಸನ್ಮಾನಿಸುತ್ತಾನೆ.

The king honours the poet.

ii) ವಾಲ್ಮೀಕಿ ಮಹರ್ಷಿಗಳು ರಾಮಾಯಣವನ್ನು ರಚಿಸಿದರು.

The great sage Valmiki composed Ramayana.

iii) ಭಾರತವು ವಿಶ್ವಶಾಂತಿಗಾಗಿ ಪ್ರಯತ್ನಿಸುತ್ತದೆ.

India vows global peace.

iv) ಈ ಮಾವಿನ ಹಣ್ಣುಗಳು ಬಹಳ ಸಿಹಿಯಾಗಿವೆ.

These mango fruits are very sweet.

50. कन्नडभाषया आङ्ग्लभाषया वा अनुवदत । 1×4=04.

i) इदानीम् अरण्ये प्राणिनाम् रक्षणम् आवश्यकम् ।

ii) यूयं ग्रामं गच्छत ।

iii) पितरः स्वपुत्रान् प्रीणयन्ति ।

iv) भारतदेशस्य संस्कृतिः सनातना वर्तते ।

XII. 51. परिच्छेदमिमं पठित्वा प्रश्नानाम् उत्तराणि लिखत - [संस्कृतभाषया] 4.

ऋतुराजो हि वसन्तः। निखिलमिदं जगत् चारुतरं सम्पद्यते वसन्ते। हेमन्ताक्लिष्टा चेयं वसुन्धरा पुनः नवीभवति। अहो रमणीयता किसलयानाम्! मधुरिमा पुष्पाणां, सरसता फलानाम्। सरोवरे कमलानि विकसन्ति। भ्रमराः गुञ्जन्ति। पञ्चमं कूजन्ति पिकाः। प्रसन्नं वहन्ति नद्यः। वायुः मन्दं मन्दं प्रयाति। प्रसन्ना प्रतिभाति

प्रश्नाः -

i) वसन्तः कः ?

ii) हेमन्ताक्लिष्टा का ?

iii) कमलानि कुत्र विकसन्ति ?

iv) पञ्चमं के कूजन्ति ?

—०—